२कुष्माण्डां लतायां राजनिघण्टुकोषः ।

**शुनीर** पु० शुनी+समूहार्थे र । कुक्कुरीसमूहे त्रिका० ।

**शुन्ध** शुद्धौ अक० शोधने सक०चु० उभ० सेट् । शुन्धयति ते अशुशुन्धत् त ।

**शुन्ध** शुद्धौ अक० शुद्धीकरणे सक० भ्वा० उभ० सेट् । शुन्धति ते अशुन्धीत् अशुन्धिष्ट । "आपः शुन्धन्तु मैनसः" इति सन्ध्यामन्त्रः ।

**शुन्ध्यु** पु० शुन्ध–युच तस्य न अनादेशः । वायौ उणा० ।

**शुन्भ** दीप्तौ अक० मर्दने सक० तु० पर० सेट् । शुभति अशुभ्भीत् "प्राणप्राप्तनिशुम्भशाम्भवधनु"रिति वी०च०

**शुन्य** न०शुनीनां समूहः यत् । १कुक्कुरीसंघे त्रिका०शून्य+पृषो० । २रिक्ते जटा० ।

**शुभ** दीप्तौ अक० हिंसने सक०तु०सुचा० पर० सेट् । शुभति [अशोभीत् ।

**शुभ** दीप्तौ भ्वा०आ०अक०सेट् । शोभते लुदित् अशुभत् शुशुभे

**शुभ** न०शुभ–क । १मङ्गले २शुभयुक्ते त्रि० अमरः । ३पद्मकाष्ठे राजनि० ४विष्कम्भादिषु मध्ये त्रयोविंशयोगे पु० ५खेचरपुरभेदे न० मेदि० । [शुभंयुः" इति भट्टिः ।

**शुभंयु** त्रि०शुभम्+अस्त्यर्थे युस् । शुभान्विते अमरः "क्षितिपः

**शुभगन्धक** न०शुभोगन्धोऽस्य कप् । १बोले राजनि० २शुभगन्धयुते त्रि० । [क्षीणाधिकचन्द्रे पापग्रहायुक्ते बुधे च ।

**शुभग्रह** पु०शुभः शुभदायकः ग्रहः । १सौम्यग्रहे २गुरौ शुक्रे

**शुभङ्कर** त्रि०शुभं करोति कृ–खच् मुम् च । २मङ्गलकारके ३दुर्गायां स्त्री शब्दमा० ङीप् । [१मङ्गलदातरि त्रि० ।

**शुभद** पु० शुभं ददाति दा–क । १अश्वत्थवृक्षे राजनि० ।

**शुभदन्ती** स्त्री शुभा दन्ता यस्याः ङीष् । १सुदत्यां स्त्रियां २पुष्पदन्तदिग्गजयोषिति च मेदि० ।

**शुभपत्री** स्त्री० शुभानि पत्त्राण्यस्याः ङीप् । (शालपान) क्षुपे वा कप् । शुभपत्त्रिका तत्रार्थे राजनि० ।

**शुभम्** अव्य० शुभ–कम् । मङ्गले "शुभंयुः" ।

**शुभवासन** पु० शुभं वासयति सुखम् वासि–ल्यु । सुखवासने द्रव्ये शब्दच० ।

**शुभसूचनी** स्त्री देवीभेदे (सुवचनी) "रक्ता पद्मचतुर्मुखी त्रिनयना चामीकरालङ्कृता पीनोत्तुङ्गकुचा दुकूलवसना हंसाधिरूढा परा । ब्रह्मानन्दमयी कमण्डलुकराच्चाभीतिहस्ता शिवा ध्येया सा शुभसूचनी त्रिजगतामम्बापदुद्धारिणी" । सा च स्त्रीभिः पूज्या ।

**शुभा** स्त्री शुभ–क । १शोभायां २कान्तौ ३इच्छायां मेदि० । ४रोचनायां ५गोरोचनायां ६शम्यां ७प्रियङ्गौ ८श्वेतदूर्वायां राजनि० । ९देवसभायां शब्दच० १०उमासखीभेदे शब्दच० । [सखीभेदे स्त्री शब्दमा० ।

**शुभाचार** त्रि०शुभ आचारोयस्य । १शोभनाचारयुते २उमा-

**शुभाञ्जन** पु० शुभ–क शुभम् अञ्जनं यस्मात् ५ब० । शोभाञ्जनवृक्षे शब्दर० ।

**शुभ्र** न०शुभ–रक् । १अभ्रके मेदि० २रौप्ये ३कासीसे ४शुभ्रलवणे राजनि० । ५चन्दने शब्दच० । ६श्वेतवर्णे पु० ७तद्वति त्रि० अमरः ।

**शुभ्रकर** पु० शुभ्राः करोऽस्य । १चन्द्रे २कर्पूरे च । शुभ्रकिरणशुभ्रांशुप्रभृतयोऽप्यत्र । [जयोषिति अमरः

**शुभ्रदन्ती** स्त्री शुभ्रो दन्तो यस्याः ङीप् । पुष्पदन्तदिग्ग-

**शुभ्रालु** पु० कर्म० । १महिषकन्दे राजनि० । २श्वेतालौ च ।

**शुभ्रि** पु० शुभ–क्रि । चतुर्मुखे ब्रह्मणि सि०कौ० ।

**शुम्भ** पु० शुन्भ–अच् । दानवभेदे । शुम्भश्च प्रह्लादपुत्रविरोचनात्मजगवेष्ठिनः पुत्रः एकः "विरोचनस्य प्राह्लादिः पञ्च तस्यानुजाः स्मृताः । गवेष्ठी कालनेमिश्च जम्भो वाष्कल एव च । शुम्भश्चैव निशुम्भश्च विष्वक्सेनो महौजसः । गवेष्ठिनः सुता ह्येते" वह्निपु० अपरश्च "कश्यपस्य दनुर्नाम भार्य्यासीत् द्विजसत्तम ! । तस्यास्तु द्वौ सुतावास्तां सहस्राक्षाद्बलाधिकौ । ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः" वामनपु० । देवीमाहा० अपरोऽपि देव्या निहतः । तदन्योऽपि तत्रैव ११अ० "शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी" इत्युक्तः ।

**शुम्भमर्दिनी** स्त्री शुम्भं मृद्नाति मृद–णिनि । दुर्गायां हेमच० । हन–णिनि । शुम्भघातिनी शब्दच० ।

**शुम्भपुरी** स्त्री ६त० । (शम्भलपुर) एकचक्राख्ये पुरे त्रिका० ।

**शुर** मारणे स्तम्भने च दि०आ०सक०सेट् । शूर्य्यते अशोरिष्ट ।

**शुल्क** कथने, सर्जने, वर्जने च चु०उभ०सक० सेट् । शुल्कयति ते अशुशुल्कत् त ।

**शुल्क** पु०न० शुल्क्यते अतिसृज्यते कर्मणि घञ् । १घट्टादिदेये राजकरे मेदि० २राजग्राह्यकरभेदे अमरः । वरपक्षात् कन्यापक्षीयैः ३ग्राह्ये धने ४स्त्रीधनभेदे "भगिनीशुल्कं सोदर्य्याणाम्" इति स्मृतिः । सम्भोगार्थं स्त्रीभ्यः देये ५धने "अशुल्कोपहृतायास्तु पिण्डदा वोढुरेव ते" इति स्मृतिः ६पणे च । [द्रव्यकरादानस्थाने ।

**शुल्कस्थान** न०६त० । (घाटि) २घट्टे भूपानां क्रयविक्रययोग्य

**शुल्ल** न० शुल्ल–अच् पृषो० । १ताम्रे २रज्जौ च अमरटीका ।